चतुर्थे मासि स्थिरत्वमापद्यते गर्भस्तस्मात्तदा गर्भिणी गुरुगात्रत्वमधिकमापद्यते विशेषेण। पञ्चमे मासि गर्भस्य मांसशोणितोपचयो भवत्यधिकमन्येभ्यो मासेभ्यस्तस्मात्तदा गर्भिणी कार्श्यमापद्यते विशेषेण। षष्ठे मासि गर्भस्य बलवर्णोपचयो भवत्यधिकमन्येभ्यो मासेभ्यस्तस्मात्तदा गर्भिणी बलवर्णहानिमापद्यते विशेषेण। सप्तमे मासि गर्भः सर्व्वभावैराप्यायते सहसा तस्मात्तदा गर्भिणी सर्व्वाकारैः क्लान्ततमा भवति। अष्टमे मासि गर्भश्च मातृतो गर्भतश्च माता रसवाहिनीभिः संवाहिनीभिर्मुहुर्मुहुरोजः परस्परत आददाते गर्भस्य सम्पूर्णत्वात् तस्मात्तदा गर्भिणी मुहुर्मुदा युक्ता भवति मुहुर्मुहुश्च म्लाना तथा गर्भस्य जन्मव्यापद्भवत्योजसोऽनवस्थितत्वात् तथैवमभिसमीक्ष्याष्टमं मासमगणयमित्याचक्षते कुशलाः।” इति चरके शारीरस्थाने चतुर्थेऽध्याये॥

“स्तनयोः कृष्णमुखता रोमराज्युद्गमस्तथा।
अक्षिपक्ष्माणि चाप्यस्याः संमील्यन्ते विशेषतः॥
अकामतश्छर्दयति गन्धादुद्विजते शुभात्।
प्रसेकः सदनञ्चापि गर्भिण्या लिङ्गमुच्यते॥

तदा प्रभृत्येव व्यायामं व्यवायमपतर्पणमतिकर्षणं दिवास्वप्नं रात्रिजागरणं शोकं यानावरोहणं भयमुत्कटकासनं चैकान्ततः स्नेहादिक्रियां शोणितमोक्षणञ्चाकाले वेगविधारणञ्च न सेवेत।

दोषाभिघातैर्गर्भिण्या यो यो भागः प्रपीड्यते।
स स भागः शिशोस्तस्य गर्भस्थस्य प्रपीड्यते॥”
“इन्द्रियार्थांस्तु यान् यान् सा भोक्तुमिच्छति गर्भिणी।
गर्भाबाधभयात्तांस्तान् भिषगाहृत्य दापयेत्॥
सा प्राप्तदौहृदा पुत्रं जनयेत गुणान्वितम्।
अलब्धदौहृदा गर्भे लभेतात्मनि वा भयम्॥
येषु येष्विन्द्रियार्थेषु दौहृदे वै विमानना।
प्रजायेत सुतस्यार्तिस्तस्मिंस्तस्मिंस्तथेन्द्रिये॥
राजसन्दर्शने यस्या दौहृदं जायते स्त्रियाः।
अर्थवन्तं महाभागं कुमारं सा प्रसूयते॥
दुकूलपट्टकौशेयभूषणादिषु दौहृदात्।
अलङ्कारैषिणं पुत्रं ललितं सा प्रसूयते॥
आश्रमे संयतात्मानं धर्म्मशीलं प्रसूयते॥
देवताप्रतिमायान्तु प्रसूते पार्षदोपमम्।
दर्शने व्यालजातीनां हिंसाशीलं प्रसूयते॥
गोधामांसाशने पुत्रं सुषुप्सुं धारणात्मकम्।
गवां मांसे च बलिनं सर्व्वक्लेशसहन्तथा॥
माहिषे दौहृदाच्छूरं रक्ताक्षं लोमसंयुतम्।
वराहमांसात् स्वप्नालुं शूरं सञ्जनयेत् सुतम्॥
मार्गाद्विक्रान्तजङ्घालं सदा वनचरं सुतम्।
सृमरादुद्विग्नमनसं नित्यभीतञ्च तैत्तिरात्॥
अतोऽनुक्तेषु या नारी समभिध्याति दौहृदम्।
शरीराचारशीलैः सा समानं जनयिष्यति॥

कर्म्मणा चोदितं जन्तोर्भवितव्यं पुनर्भवेत्।
यथा यथा दैवयोगाद्दौहृदं जनयेद्धृदि॥”
इति सुश्रुते शारीरस्थाने तृतीयेऽध्याये॥)

गर्भिणीक्षीरम्, क्ली, (गर्भिण्याः क्षीरम्।) चीराक्षीरम्। इति शब्दचन्द्रिका॥ चीराइ इति भाषा॥

गर्भिणीपरिचर्य्या, स्त्री, (गर्भिण्याः गर्भवत्याः परिचर्य्या परित इव परिचर्य्या।) कुमारभृत्या। गर्भिणीपरिचर्य्या। इति त्रिकाण्डशेषः॥

गर्भोपघातिनी, स्त्री, (गर्भं उपहन्तीति। उप+हन्+“सुप्यजातौ णिनिस्ताच्छील्ये।” ३।२।७८। इति णिनिः। गर्भं उपघातयतीति। हन्+णिच् णिनिः। इति केचित्।) असृती ह्यपोपगमनादिविशात् यस्याः गर्भपातो भवति सा गौः। गावड़ाफेला गाइ इति भाषा॥ तत्पर्य्यायः। वेहत् २। इत्यमरः। २।९।६९॥

गर्म्मुत्, स्त्री, (गीर्य्यते भक्ष्यते प्राकृतैरिति। गॄ निगरणे+“ग्रो मुट् च।” उणां। १।९७। इति उति मुडागमश्च।) तृणधान्यविशेषः। इत्यमरो भरतश्च॥ मयना इति ख्यातः। गड़गड़ इति केचित्॥ (गीर्य्यते भक्ष्यते यद्वा गीर्य्यते विज्ञाप्यते विख्याप्यतेऽनेनेति। गॄ+उति मुट् च।) स्वर्णम्। नड़ः। इति मेदिनी। ते। १०७॥

गर्म्मूटिका, स्त्री, (गर्म्मुत् इव उटं पत्रमस्याः। कप्+टाप्+अत इत्वञ्च। पृषोदरात् तकारलोपः।) व्रीहिभेदः। माड़या इति भाषा॥ तत्पर्य्यायः। गर्म्मूच्छदः २। इति रत्नमाला॥

गर्म्मोटिका, स्त्री, (गर्म्मूटिका+निपातनात् ऊकारस्यौकारः।) जरड़ीतृणम्। इति राजनिर्घण्टः॥

गर्व्व, मदे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) मद इह अहङ्कारः। नीचो गर्व्वति सम्पदा। इति दुर्गादासः॥

गर्व्वः, पुं, (गर्व्व मदे+भावे घञ्। यद्वा, गिरति मदमत्तत्वात्मानमुन्निरतीव इति। गॄ निगरणे+“कॄगॄशॄदॄभ्यो वः।” उणां। १।१५५। इति वः।) अहङ्कारः। इत्यमरः। १।७।२२॥ (यथा, रामायणे। २।३१।२०।
“यदि दुःखी न रक्षेत भरतो राज्यमुत्तमम्।
प्राप्य दुर्म्मनसा वीर! गर्व्वेण च विशेषतः॥”)
अहङ्कारस्तथाध्यात्मं सर्व्वसंसारकारकम्।
अभिमानोऽधिभूतश्च रुद्रस्तत्राधिदैवतम्॥”
इति महाभारते आश्वमेधिकपर्व्व॥
(अयं हि व्यभिचारिभावविशेषः। तल्लक्षणं यथा, साहित्यदर्पणे। ३।१५०।
“गर्व्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः।
अवज्ञासविलासाङ्गदर्शनाविनयादिकृत्॥”)

गर्व्वाटः, पुं, (गर्व्वेण मदेन अटतीति। अट्+अच्। शकन्ध्वादित्वात् अलोपः।) द्वाःस्थितः। द्वारपालः। इति त्रिकाण्डशेषः॥

गर्व्वितः, त्रि, (गर्व्वः सञ्जातोऽस्य। गर्व्व+“तदस्य सञ्जातं तारकादिभ्य इतच्।” ५।२।३६। इति इतच्। यद्वा, गर्व्व+कर्त्तरि क्तः।) गर्व्वयुक्तः। अहङ्कृतः। इति जटाधरः॥ (यथा, रघुः। ९।५५।
“आविर्बभूव कुशगर्भमुखं मृगाणां
यूथं तदग्रसरगर्व्वितकृष्णसारम्॥”)

गर्ह, ङ कुत्सने। इति कविकल्पद्रुमः। (भ्वां-आत्मं-सकं-सेट्।) रेफोपधः। ङ, गर्हते। कुत्सनं निन्दा। इति दुर्गादासः॥ (यथा, रामायणे। २।८२।१०।
“स वाष्पकलया वाचा कलहंसस्वरो युवा।
विललाप सभामध्ये जगर्हे च पुरोहितम्॥”)

गर्ह, कि कुत्सने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) कि, गर्हयति गर्हति। इति दुर्गादासः॥ (यथा, भागवते। ६।७।१०।
“गर्हयामास सदसि स्वयमात्मानमात्मना॥”
तथा, तत्रैव। ४।४।१०।
“जगर्ह सामर्षविपन्नया गिरा
शिवद्विषं धूमपथश्रमस्मयम्॥”)

गर्हणं, क्ली, (गर्ह कुत्सने+भावे ल्युट्।) निन्दा। इत्यमरः। १।६।१३॥

गर्हा, स्त्री, (गर्ह्यते निन्द्यते इति। गर्ह कुत्सने+“गुरोश्च हलः।” ३।३।१०३। इति स्त्रियां अः ततष्टाप्।) निन्दा। इति शब्दरत्नावली॥ (यथा, पञ्चतन्त्रे। १।१८७।
“कुलपतनं जनगर्हां
बन्धनमपि जीवितव्यसन्देहम्।
अङ्गीकरोति कुलटा
सततं परपुरुषसंसक्ता॥”)

गर्हितं, त्रि, (गर्ह्यते स्म इति। गर्ह+क्त। यद्वा, गर्हा सञ्जाताऽस्य। गर्हा+इतच्।) निन्दितम्। यथा, चाणक्ये। ५०।
“अतिदर्पे हता लङ्का अतिमाने च कौरवाः।
अतिदाने बलिर्बद्धः सर्व्वमत्यन्तगर्हितम्॥”

गर्ह्यः, त्रि, (गर्ह्यते निन्द्यते इति। गर्ह ङ निन्दायाम्+“ऋहलोर्ण्यत्।” ३।१।१२४। इति ण्यत्।) अधमः। निन्द्यः। इत्यमरः। ३।१।५४॥ (यथा, मनुः। ५।१४९।
“पित्रा भर्त्त्रा सुतैर्व्वापि नेच्छेद्विरहमात्मनः।
एषां हि विरहेण स्त्री गर्ह्ये कुर्य्यादुभे कुले॥”)

गर्ह्यवादी, [न्] त्रि, (गर्ह्यं वदतीति। गर्ह्य+वद्+“सुप्यजातौ णिनिस्ताच्छील्ये।” ३।२।७८। इति णिनिः।) कद्वदः। इत्यमरः। ३।१।३७॥

गल, भक्षे। स्रावे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-स्रावे अकं-सेट्।) गलति। इति दुर्गादासः॥ (स्रावार्थे यथा, कथासरित्सागरे। ११।५७।
“इति मे तव कल्याणमपश्यन्त्या गलन्त्यमी।
सन्तापक्वथिताः प्राणा इव वाष्पाम्बुबिन्दवः॥”)

गल, क ङ स्रावे। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-अकं-सेट्।) स्रावः। क्षरणम्। क ङ, गालयते रक्तं क्षतस्य। इति दुर्गादासः॥